Topic 21

समानाधिकरण कर्मधारय समास-3

तत्पुरुषः समानाधिकरणः कर्मधारयः।

पुंवत् कर्मधारयजातीयदेशीयेषु।

कर्मधारये जातीयदेशीययोश्च परतो भाषितपुंस्कात्पर ऊङभावो यस्मिंस्तथाभूतं पूर्वं पुंवत्। पूरणीप्रियादिष्वप्राप्तः पुंवद्भावो विधीयते। महानवमी। कृष्णचतुर्दशी। महाप्रिया। तथा कोपधादेः प्रतिषिद्धः पुंवद्भावः कर्मधारयादौ प्रतिप्रसूयते। पाचकस्त्री, दत्तभार्या, पञ्चमभार्या, सुकेशभार्या, ब्राह्मणभार्या। एवं पाचकजातीया पाचकदेशीया इत्यादि। इभपोटा। पोटा स्त्रीपुंसलक्षणा। इभयुवतिः। अग्निस्तोकः। उदश्वित्कतिपयम्। गृष्टिः सकृत्प्रसूता, गोगृष्टिः। धेनुर्नवप्रसूता, गोधेनुः। वशा वन्ध्या गोवशा। वेहद्गर्भघातिनी गोवेहत्। बष्कयण्यस्तरुणवत्सा, गोबष्कयणी। कठप्रवक्ता। कठश्रोत्रियः। कठाध्यापकः। कठधूर्तः।

प्रशंसावचनैश्च। एतैः सह जातिः प्राग्वत्। गोमतल्लिका। गोमचर्चिका। गोप्रकाण्डम्। गवोद्धः। गोतल्लजः। प्रशस्ता गौरित्यर्थः। मतल्लिकादयो नियतलिङ्गा, न तु विशेष्यनिघ्नाः। जातिः किम्- कुमारी मतल्लिका

युवा खलति पलित वलिन जरतीभिः

पूर्वनिपातनियमार्थं सूत्रम् । लिङ्गविशिष्ट परिभाषया युवतिशब्दोऽपि समस्यते ।

युवा खलतिः युवखलतिः । युवतिः खलती युवखलती । युवजरती । युवजरती । युव-त्वमेव जरती धर्मोपलम्भेन तद्रूपारोपात्-सामानाधिकरण्यम्

कृत्यतुल्याख्या अजात्या ।

भोज्योष्णम् । तुल्यश्वेतः । सदृशश्वेतः ।

अजात्या किम् - भोज्य ओदनः ।

प्रतिषेधसामर्थ्याद् विशेषण समासोऽपि न ।

वर्णो वर्णेन समानाधिकरणेन-सह प्राग्वत् । कृष्णसारङ्गः ।